This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



३२६

श्रीगणेशाय नमः ॥ यदज्ञानादिदं विश्वं यज्ज्ञानान्नैव ह
किंचिन । तज्ज्ञानं परमानंदं वंदे शंकररूपिणं ॥१॥ मुकं क
रोति वाचालं ॥२॥ पूर्वकांडे उपात्तदुरितक्षयार्थं नित्यक
र्माणि दर्शपौर्णमासादिन्यक्कानि काम्यानि फलार्थिनी
इदानिं काम्यादिकरणविधानिवत्सर्थं प्रस्तूयते । तस्याः
कर्मकांडेन संबंधः । उपादेयत्वेनोच्यते । तत्र दर्शपौर्णमा
सादिनाकर्माणि उच्चावच्च फलार्थंतया विहितानिनपर
मपुरुषार्थसाधकानि । यतः साध्यफलानि तानि । अ
नित्यंच साध्यचं त्कृतं तदनित्यमिति नियममिति नियमात्
श्रुतेश्च । तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामु
त्रपुण्यजितो लोकः क्षीयते इति ॥ यदीह वा अप्यनेक
महत्पुण्यं कर्म करोति तद्धास्य । ततः क्षीयत एवेति च
योवा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति ददाति ॥

Checked 2012

ACC. No:- ~~1148~~ M1082
title:- ईशावास्यभाष्य
Date:- A.D. 1854.
Author:- शंकराचार्य
subject:- वेदांत
पृ (32)

KKSU LIBRARY
RAMTEK
441 106
M1082
Dist. Nagpur

①

तपस्यत्यपि बहूनी वर्षसहस्राण्यंतवानेवास्य स लोको
भवतीति। ननु हितोपदेष्टा वेदो भवजाले कर्म किमर्थं
कथितवानित्याह। पुसांमभिष्टसाधनोपायप्रदर्शना
यवर्तमानो वेदोनादिभवपरंपरानुभूतानेकविषय
वासनावासितांतःकरणेन विषयासक्तमानसं प्रति
सहसा विषयं परत्वनिवर्तनेन परमानंदाविर्भावप्रत्य
स्म गात्मं ब्रह्मश्रवणेनामायाघ परब्रह्मात्मतत्त्वं बोधयितुमश
क्नुवन्नादौ कर्माण्येव पुरुषार्थसाधनतयोपदिशतीति॥
ततो नित्यनैमित्तिककर्मानुष्ठानाच्छुद्धांतःकरणस्यई
श्वरार्पणंकर्मकरणबुद्धिं संपाद्यतो ततोतिशुद्धांतःकर
णस्य नित्यानित्यवस्तुविवेकेनेहामुत्रार्थभोगराग
शून्यस्य लोकव्यवहारेरविक्षिप्यमानस्य मनोविश्रांति
कोमस्यमानस्य शांत्यादिसाधनवतोऽधिकारं संपति
मालक्ष्य प्रत्यगात्मतत्त्वब्रह्मअध्यारोपापवादाभ्याम

②

वः। गम्यस्वयंचेतनेनैवागमेनैं स एतस्मिन्नेवात्मतत्वे ब्र
ह्मणो विलीयमानो ब्रह्ममात्रमद्वयं सत्यज्ञानानंतानंदै
करसमवतीष्ठत इति। एवमुक्तलक्षणाधिकारिणं प्रति
कृपया साक्षात् स्वयमाचार्यस्वरूपा श्रुतिराह॥१॥ ईशावा
स्यमिदं सर्वं यत्किंचजगत्यां जगत् इति॥ राम। कृष्ण
ईश ऐश्वर्ये। ईष्टे इति ईट् ईश्वरः। आनंदात्मा तेन ब्र
ह्मविष्णुरुद्रादिनाम्ना प्रसिद्धेन ईशा इति ख्यास्वामि
ना सर्वभूतानामात्मभूतेन वास्यं। वस निवासे। अंतर्ब
हिश्च वसनीयं आच्छादनीयं। व्याप्यमिति यावत्। किं ना
नाविधप्रत्यक्षगम्यं साक्षिदृश्यं सर्वं निखिलं। सर्वशब्दा
र्थमाह। यत्किंच। यत्किंचित्। लोकप्रसिद्धं वस्तुजातं
जगत्यां। ब्रह्मांडकटाहमध्ये जगत्। स्थावरं जगमा
त्मकं दृष्टं श्रुतं च। श्रुत्यंतरेपि। यत्किंचिज्जगत्सर्वं
दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायण

3

कृ

णः स्थित इति। गीतास्वपि। अथवा बहुनैतेन किं ज्ञानेन
तवार्जुन। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि
२ ति। आत्मैवेदं सर्वमिति बुद्धिः संपादनीयेत्यर्थः। अ
त्र साधानमाह। श्रीराम। तेन त्यक्तेन भुंजीथा मा गृ
धः कस्य स्विद्धनं ॥ २॥ श्रीराम॥ तेन सर्वत्रात्मबु
द्धिसंपादनेन स्वस्मिन्नारोपितस्य जगतस्त्यक्तेन
जगबुद्धिविनाशरूपेण भुंजीथाः॥ भुंज पालनव्य
वहारयोः। आत्मसाक्षात्कारलक्षणं भोजनं कुर्या इ
अथवा सर्वत्रात्मानुसंधानं पालयेथाः। आत्मला
भान्नपरं विद्यत इति श्रुतेः। सर्वेषामपि चैतेषां मा
त्मज्ञानं परं स्मृतमिति श्रुतेश्च मा गृधः॥ गृधु अ
भिकांक्षायां॥ मा कांक्षि। किं। कस्य स्विद्धनं स्विदि
त ति निपातो वितर्कवचनः। कस्यापि धनं मदांधस्य कृपण
स्य धर्माधर्मविवेकशून्यस्य पतितस्य कुटिलस्य धनं

सूवर्णादियोगक्षेमार्थे द्रव्याकांक्षामाकर्षीरिसर्थः ।
अस्मानुच्चिंतनेनैवपूर्णकामो भव । अनंन्याश्चिंतयं
तो मां ये जनाः पर्युपासते । तेषांनित्याभियुक्तानांयो
गक्षेमंवहाम्यहं । इतिभगवद्गीतावाक्यविश्वासाश्च
कस्यस्विद्धनमित्याक्षरार्थः । नकस्यस्विद्धनमस्ति
पदृस्वेन आत्मव्यतिरिक्तं किंचिदपि नास्तीसर्थः । त
थाचश्रुतिः । आत्मैवेदंसर्वं । सर्वंखल्वीदंब्रह्म । विश्व
मेवेदंपुरुषस्तद्विश्वमुपजीवन्ति । पुरस्ताद्ब्रह्म । दक्षि
णतोब्रह्म । पश्चाद्ब्रह्मोत्तरश्च । अधश्चोर्ध्वंप्रसृतं । स
सब्रह्मसशिवः सहरिः सेंद्रः सोक्षरः परमस्वराट् ॥
सएवविष्णुः सप्राणः सलोकोग्निः सचंद्रमाः । सए
वसर्वंयद्भूतंयच्चभाव्यं सनातनं । ज्ञात्वातंमृत्युमत्येति
नान्यः । पंथाविमुक्तिदः । इसाद्यनेकश्रुतिसमुच्चयात् ।

न्तगतानपि। समंपश्यन्हि सर्वत्रसमवस्थितमिश्वरं। न
हिनस्त्यात्मनात्मानं ततोयाति परांगतिं इति। तथा सर्वभूत
स्थितंमिश्वरं। योमांभजत्येकत्वमास्थितः सर्वथावर्त
२ मानोपि सयोगी मइवर्तत इति।। कर्मसारो नापि वर्तमानो
योज्ञानीमप्येववर्तने मुच्यते। ननुत्वंवदसीत्यर्थः। यस्त्व
विधानिमीनोतरपूर्वोद्यपोरक्षोषविनाशोज्ञावान्। विष
यत्यागे समर्थस्तांप्रेतिकरणाकृतिः। साधनमाह। श्री
राम। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।। श्री
कृष्ण। इह कर्मभूमौ कर्माण्यग्निहोत्रादीनि ईश्वरप्री
त्यर्थं कुर्वन्नेव यत्नवान् जिजीविषेत्। जिवितुमिच्छेत्।
शतं समाः शतवर्षाणि धनवैराग्यज्ञानोपायवत्यादिस
र्थः। ईश्वरार्पणं कर्म कुर्वतः। कर्मलोपो नभवतीत्यर्थः।
एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे।। श्रीराम। ए
वमुक्तप्रकारेण ईश्वरप्रीत्यर्थं कर्माणि कुर्वन्ति। नरेनरा

त्मानि नित्यपि कर्म न लिप्यते। भवान् कर्मणा न लि
प्यत इत्यर्थः। नान्यथेतोस्तीति। इतः एतस्मादीश्वरार्पण
बुध्या कर्मानुष्ठालक्षणमार्गात्। अन्यथा मार्गान्तरं ना
स्ति। येन मार्गेणाशुभं कर्म न लिप्यते। अतः शास्त्रवि
हितान्यग्निहोत्रादीनि कुर्वन्नेव जीजीविषेदित्यर्थः।
भगवानपि। ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा क
रोति यः। लिप्यते न स पापेन पद्मपत्रमिवांभसा इ
ति। तथा। अनाश्रितः कर्मफलं कार्यं कर्म करोति यः॥ ती
सी स सन्या च योगी च न निरग्निर्न चाक्रियः। इति। फल
त्यागेन विध्युक्तं कर्म कुर्वतस्तावधनाविषयेपि वैराग्यं
भविष्यतीत्यर्थः। तदुक्तं भवति। साक्षादानंदासा
नुभावपर्यंतमेको ज्ञानमार्गः। ईश्वरप्रीतये कर्मक
रणं द्वितीयो मार्गः। देवतोपासनं तृतीया समकमेव अ

स्मादैहिकमार्गद्वया पुरूषार्थसाधने मार्गान्तरं नास्तीत्यर्थः।
वसिष्ठश्च। अतस्मिन्निरनाशायशब्दबोधो निरर्थकः॥ त
मोननश्यतेरामरूपयादि पचार्यया। ग्रंथातुरपि। संसारि
कक्रियायुक्तं ब्रह्मज्ञोस्मीतिवादि[illegible]नं। कर्मब्रह्मोन्यान्त्र
ष्टं तं सज्जोदं सुजं यथा। छथादेवपरिसकाः कर्मकांडवि
तंडिताः। पाखंडाः पंडितमन्याः ननते किमपि जानन्त इति।
ज्ञगवानपि। न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते।
न च संन्यासनादेव सिद्धिं समधिगच्छति। इति। अत्रेत
श्चिंसते। विघासत्तो कर्मनिमित्तं चेदुच्यते। तर्हि अश्र
प मांतरानुपपत्तिः। स्यात्। गार्हस्थ्ये चविहितानी कर्माणि
अतएकाश्रम्यमेवार्थात्प्राप्तं। एवं सति यावज्जीवम
ग्निहोत्रं जुहुयात् इतिश्रुतेयोप्यनुकूलं। तराख्युः॥ तन्नः
कर्मकूपस्त्रान। नेह्यग्निहोत्रादीनि अवकर्माणि। ब्र
ह्मचर्यं तपः। सत्यवचनं रागोदमो हिंसेत्येवमादीनिक

र्माणि इतराश्रमेऽपि विद्योत्पत्तौ साधकतमानि संति । ध्या
नधारणादीन्यपि कर्माणि असंकीर्णे च दृश्यंते । किंचाज
न्मातरवृत्तकर्मभिः शुद्धांतःकरणस्य गार्हस्थ्याऽऽग
पि विद्योत्पत्तिर्दृश्यते । कर्मार्थं चा गार्हस्थ्यं प्रतिपद्यते । क
र्मसाध्यायां च विद्यायां तस्यां गार्हस्थ्यप्रतिपत्तिर्व्यर्थैवा
न लोकार्थत्वात् । पुत्रादिसाध्यलोकेभ्यो निःकामस्य नि
त्यसिद्धात्मलोकोदर्शिनः । कर्मणि प्रयोजनमपश्यतः
कथं तत्र प्रवृत्तिः स्यात् । प्रतिपन्नगार्हस्थ्यस्यापि विद्यो
त्पत्तौ विद्यापरिपाकात् । विरक्तस्य कर्मभ्यो निवृत्तिरेव
स्यात् । प्रव्रजिष्यन्वीरहे दहरहमस्मास्थानात् । अ
स्मीत्येवमादिश्रुतिलिंगदर्शनात् । कर्मसु श्रुतेर्य
त्नाधिक्यदर्शनादयुक्तमिति चेत् । अग्निहोत्रादिक
र्मसु श्रुतेरधिकोऽयत्नो मांश्चायासः । अनेकसाधन
साध्यत्वात्तेषां तपोब्रह्मचर्यादीनां चेतराश्रमकर्मणां

9

णां गार्हस्थ्येपि तुल्यत्वात्। अल्पसाधनापेक्षत्वाच्चेतरे
षां। न फलस्य वैदिकत्वाच्च भिन्नत्वस्येति चेन्न। नज
न्मांतरकृतानुग्रहात्। यदुक्तं कर्मणि श्रुतेरधिकारित्व
५ त्व इत्यादिना असमंजसं। यतो जन्मांतरीयमपीष्टत्वं कर्म
विधोत्पत्तिं प्रत्यनुग्राहकं भवति। यतः केचिज्जन्मांत
रीयमपीष्टत्वं कर्मविधौ एव विरक्ता एव दृश्यंते। केचित्क
र्मसु प्रवृत्ताः। अविरक्ता विद्याविद्वेषिणश्च दृश्यंते। तस्मा
ज्जन्मांतरे कृतसंस्कारैर्विरक्तानामाश्रमांतरप्रतिप
त्तिरेवेष्यते। पुत्रसर्गब्रह्मचर्यसादि लक्षणस्य कर्मफ
लस्य बाहुल्यत्वात्। न तत्प्रति पुरुषाणां कामश्रूयत्वाच्च
तदर्थं श्रुतेरधिकारित्वः कर्मसु प्रपद्यते। अनिष्टा
बाहुल्यदर्शनादिदमस्यादिति उपायत्वाच्च उपायभूता
नि कर्माणि सर्वेषाम्। उपाये चाधिकारित्वः कर्तव्यैः
नानोपाये। कर्मनिमित्तत्वाद्विद्यायां यत्नान्तरानर्थक्य

मिति चेत् । कर्मन्यस्य एव मक्ति बाधकत्विन क्षयाद्विद्योत्प
त्तेश्च कर्मभ्यः पृथक् उपनिषच्छ्रवणादिषु लोध्यर्थरि
वसस्यात् । न नीयमानाचारात् । न हि मक्ति बधं क्षयादेव
विद्योत्पत्तेः । नत्त्विश्वरे प्रसादात्तपोध्यानानुष्ठादना
दिति नियमोस्ति । अहिंसा ब्रह्मचर्यादीनां विद्यांप्र
स्रूपकारत्वात् साक्षात्कारणत्वाच्च । श्रवणमनननि
दिध्यासनानां । अतः सिद्धान्यांश्रमादित्तराणि । वि
द्यायाश्च सर्वेषामधिकारः । श्रेयश्चपितयेत्ति सिद्धं
अपंविद्याप्रससापेमषिद्धमिनाखे । श्रीराम । असू
र्य्या नामते लोका अंधेन तमसावृता । तांस्ते प्रेत्या
भिगच्छंति ये के चात्महनो जनाः । श्रीराम । परात्मभा
११ वमुपेक्ष्य देवादयोपि असुरेत्तेषां स्वभूता लोकाः
असुर्य्या नाम शब्दः । प्रसिद्धवाचि । ते लोकाक

र्मफलविशेषाः अंधेन अहंममताभिनिवेशरूपेणां
धतामिस्रेण तमसा अज्ञानलक्षणांधःकारेण आवृता
आच्छादिताः । तान्देहविशेषान्ते प्रवृत्तिं च निवृत्तिं
च जना न विदुरासुरा इत्यादिक लक्षणाः । ज्ञानशून्याः
प्रेत्य मृत्वा ज्ञानस्य साधनोपकारकं मनुष्यदेहं परित्य
५ ज्य अभिगच्छन्ति संमन्तात्प्राप्नुवंति । ते के साह । ये के
चन आत्महनो विज्ञानमानंदं ब्रह्मेति स्वस्वरूपावि
दो जनाः । संसारसमुद्रे पुनः पुनर्जननमरणधर्मि
णः । तथा चोक्तं । अन्यथा संतमात्मानमन्यथा प्रति
पद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा । इति
पापकारित्वाद्भवतीति श्रुतिरीदृशामात्मनः तत्त्वं
तत्साह । श्रीराम । अनेजदेकं मनसो जवीयो नैनद्देवाः
आप्नुवन्पूर्वमर्षत् । तद्धावतोन्यानत्येति तिष्ठत्तस्मि

न्नपो मातरिश्वा दधाति। एजृ कंपने कंपनमकुर्वन्॥
अनेन समष्टिप्राणयोर्निरासः। एकं स्वजातीयवीजाति
यस्वगतभेदशून्यं। इति निरूपाधिकस्वरूपमुक्तं। अथ
सोपाधिकस्वस्वरूपमुच्यते। मनसः कामादिलक्षणादं
तःकारणाज्जीवियः वेगवतरं यत्र मनो न याति तत्रपु
रतः अस्मातस्य एव प्रकाशात इत्यसर्थः। न तत्र सूर्यो भा
ति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव
भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रु
सुतराश्च। किंच। नैतद्वा अप्नुवन्। तेनादेवाः चक्षुरा
दयः। एतदात्मतत्त्वं न अप्नुवन्। नाधिगतवंतः।
कुतः। पूर्वं प्रथममतः। अर्षत्गतवत्। आकाशवद्व्या
पित्वात्सर्वगतमिसर्थः। तदात्मतत्त्वं धावतः। शी
घ्रंगच्छतः। अन्यान् कालवायवादीन् असम्वि लक्षणा।

नसेति अत्ति सगच्छतीवार्थं स्वयमेवाह । तिष्ठत्गमनक्रि
याकुर्वत् । तस्मिन्नात्मन वेगंति सूक्ष्मे निसंचेतन्यस्वभावि
आपः । प्राणिनां कर्माणि यज्ञदानहोमादीनि आग्न्यादी
नां च ज्वलनदहनादीनि मातरिश्वा मातरि आकाशे श्व
सति समष्टिव्यष्टिरूपा वायुः क्रियाशक्तिः सूत्रात्मेति यावत्
दधाति धारयति । स्थापयति वा । जीवात्मा ज्ञातः । पवन
जीवादीति सूर्य इत्यादिश्रुतिर्नि निसंचेतन्यात्मस्वरूपे
आत्मतत्त्वे सत्येव च । सर्वा हि कार्यकरणा सर्वाश्रयरूपे
न दिविक्रियाजाति सर्थः । मन्त्राणां नियमी नास्तीति पूर्वो
मन्त्रोक्तमप्यर्थः किंचिद्विशेषं दर्शयन्नाह । तदेजति तत
न्नैजतीत दूरे तद्वंतिके । तदंतरस्य सर्वस्य तदु सर्वस्या
स्य बाह्यतः । यद्भूतमात्मतत्त्व तदेजति । उपाधितश्च
लति । तदेव नयजति । स्वेस्वरूपतामचलति । निश्चलमे

१५

य। चतीवेत्यर्थः। तद्दूरे अविदुषामप्राप्यदूरत्व इव लक्ष्ये
ज्ञानांतरि तमंप्यिव। उत एव। अंतीके अति संनिधे सर्वां सकं
सानां। एष त आत्मा सर्वांतर इति श्रुतेश्च। न केवलं
दूरे। अंतिके चित्। देवेत्यर्थः। तदात्मतत्त्वं। अस्य नामरू
पक्रियात्मकस्य जगतः। सर्वस्य समग्रस्यांतमध्ये त
दु तदु च [illegible] सर्वस्यास्य बाह्यतः। बहिरपि व्योमवद्व्या
पकत्वात्। बहिरंतश्च भूतानामचरं चरमेव च। सूक्ष्म
त्वात्तदविज्ञेयं दूरस्थं चांतिके च तदिति स्मृतेश्च। त
ल्लक्षणमाह। यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्य
ति। सर्वभूतेषु चात्मानं ततो न विचिकित्सति। यस्तु
विद्वान् सर्वाणि भूतानि अव्यक्तादीनि स्थावरांतानि रा
आत्मन्येव नित्यानंदस्वप्रकाशरूप एवानुपश्यति।
अनुसंदधापश्यति। आत्मत्वेन साक्षात्कारवान् भवती
त्यर्थः। तथा। सर्वभूतेषु चात्मनः। आत्मानमपि तेषु च

विकारो नुपस्यन्ति तिक्रिया समुच्चय पार्थः। एवं सर्वत्रानं
दात्मानुदर्शनफलमाह। ततो नेव चिकित्सति। विचिकि
त्सां न प्राप्नोति। ततः आनंदात्मानं चिदेकरसमेव सर्वमि
ति विज्ञानात्। न विजिगुप्सते गुप्तरक्षणे। आनंदा
त्मनि केरेकेण किमपि न रक्षन्ति। तत्त्वंपदार्थज्ञो धने
आत्मानमेव अस्य हा विशुद्धं परिपूर्णं चिदानंदैकर
सं निरंतरं पश्यन्तीत्यर्थः। श्लोकसंतरेचु। समपश्यन्
ब्रह्मसंपदं याति। नान्येन हेतुनेति। भगवानपि सर्वभू
तस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्ता
त्मा सर्वत्र समदर्शनिः। यो मां पश्यति सर्वत्र सर्वं च म
पि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति
न प्रणश्यामि अदर्शनं न भवामि। स च ममादर्शनं न भ
वति। गुरुरूपेण प्रत्यक्षो भूत्वा तद्रूपेण दृष्ट्या कवलो
कन अनुग्रहामि प्रसादं करोमीत्यर्थः। तथा चाप्रसा

18

द सर्वदुखानां हानिरस्योपजायते । तथा च स्कांदे । बहवो
केन किं साक्षाद्देशिकस्य निरीक्षणात् । यस्माद्देवरुद्र
स्यपरशाकेनधैवच । श्रुतिशक्तिकलापुण्यपरिपाक
बलादपि । शिवरूपतया सर्वस्वभावदेवपश्यति । न
सा त्रैव । प्रसादेन विना देवं न जानंति सुरर्षयः । न जानंति
विना घ्राणं गंधं हस्तेन केवलं । पतितो पतितो वापि पं
डितो मूढ एव च । प्रसादेन क्षणादेव मुच्यते नात्र संशयः
प्रसादे सति देवेशो दुर्विज्ञेयः । सुरर्षभिः । शक्यते मनु
जैर्द्रष्टुं प्रसगस्मनयो सदा । अवतोपि महादेवप्रसादा
यमुनीश्वरः । गुरुपादांबुजं निसंपूजयध्वं यथाबल
मिति । आचार्यवान् । पुरुषो देवेति श्रुतेश्च सर्वासां श्रु
तीनामत्रैव तात्पर्यमिति । प्रदर्शनार्थं पूर्वोक्तमंत्रोक्त
मेवार्थं पुनराह । यस्मिन्सर्वाणि भूतान्यात्मैवाभूत्

द्विजानतः तत्रा को मोहः कः शो कत्वमनुपश्यतः। यस्मि
न्काले सर्वाणि भूतानि परमात्मानुभावात् देवात्मैवाभू
त् प्रतिसात्मात्मानं रूपं परित्यज्य परमानंदात्मस्वरूपमे
वाभूत्। कस्य। विजानतः। परमार्थवस्तु विजानतः।
तत्र तस्मिन्काले कस्साक्षेपमोहात्मापाकः। नको
पि स्वपर्थः। ब्रह्मवद्ब्रह्मैव भवतीति श्रुतेः। शोको नि
क्षेपात्मकः। सोपि कस्तारति। शोकमात्मविदिति श्रुतेः
८ यत एकत्वमनुपश्यतः। आनंदस्वरूपमिदं सर्वमह
मस्मीति विजानतः। तथा बृहदारण्ये। आत्मानं चे
द्विजानीयादयमस्मीति पुरुषः। किमिच्छन् कस्य का
माय शरीरमनुसंचरेदिति। श्रुत्यंतरेपि। यथा पर्व
तमादीप्तं नाश्रयंति मृगद्विजाः। तथा ब्रह्मविदो दो
षं नाश्रयति कदाचनेति। एकत्वं प्राणमनसोरिंद्रि
याणां तथैव च। सर्वभोगपरित्यागो योग इत्यभि

धीयते। तस्मान्निदिध्यवसायो निःसंकल्पो निरभिमानस्तिष्ठेत्। एतन्मोक्षलक्षणमिति श्रुतेः। असङ्गारो। कर्संत्रिर्णो नान्निमन्त्रि कुतश्चनेति। भगवानपि। विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः। निर्ममो निरहंकारः स शान्तिमधिगच्छति। एषा ब्राह्मी स्थिति पार्थ नेनां प्राप्य विमुह्यति। स्थित्वास्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति। स्कांधे। ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शिनां। न च विद्या न चाविद्या न जगच्च न चापरं। नाहकुरूपो महादेवः खलु साक्षात्सनातनः। ईदृशी परमा निष्ठा गुरोः साक्षान्नेति लक्षणात्। कर्मसाम्यं नच मायायासा सान्निध्यसेवनसंतापः इति। छंदोगे। य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेतदमृतमभयमेतद्ब्रह्मेति। इति सर्वशास्त्ररहस्यमुक्ता। अथ पूर्वमेवैरुक्ते आनंदात्मानस्य स्वरूपमाह।

१९

सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं कविर्मनीषी: परिभूः स्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥ स पूर्वोक्त आनंदात्मा पर्य्यगात् । परितः समंतात् । अधिगच्छतवान् । व्योमवत्सर्वव्यापिन इत्यर्थः । शुक्रं शुचि दिप्तौ । शुचिमद्दीप्तिमानित्यर्थः । अकायं अदेहं सूक्ष्मशाशरीरवर्जितं ॥ अव्रणं अच्छिद्रं अहत इत्यर्थः । नत्र हेतु । शुद्धं निर्मलं । यतः । अपापविद्धं दुःखहेतुरविद्या तद्रहित इत्यर्थः । शुक्रमित्यादिवचनानि पुंल्लिंगत्वेन परिणेयानि । यतः सपर्यगादित्युपक्रम्य कविर्मनीषी स्वादीनां पुंल्लिंगत्वेनोपसंहारात् । कविः क्रांतदर्शी सर्वदृष्टेत्यर्थः । तत्र हेतु । परिभूः सर्वोपरि भवतीति परिभूः सर्वोपरिस्थितः । स्वयंभूः कारणांतरनिरपेक्ष स्वयमेव भवतीति स्वयंभूः सर्वरूपीत्यर्थः । यथा

तथ्यतः यथातथाभावो याथातथ्यं तस्माद्यथाभूतक
र्मफलसाधनतः। अर्थान् निविधपदार्थान्व्यदधात्
कल्पितवान्यथानुरूपं व्यभजदित्यर्थः। शाश्वतीभ्यो
नित्याभ्यः समाभ्यः संवत्सराभिदाभ्यः प्रजाभ्य
इत्यर्थः। एवमात्मनः स्वस्वरूपमुक्त्वेदानीं येकेव
लकर्मपराः कामिनस्तारप्रसोहः। अंधंतमः प्रवि
शंति ये विद्यामुपासते। अंधंतमः अहंममताभिमानात्म
कं तमः प्रविशंति प्रकर्षेण प्राप्नुवंति। के। येऽविद्या
अग्निहोत्रादिलक्षणमेवं केवलाकलाभार्थं उपास
ते। तदेकनिष्ठा[illegible] संतः अनुतिष्ठंति ननु तर्हि कर्मस
क्त्वा ज्ञानमेव कर्तव्यं। अहं ब्रह्मास्मीति वाचकव्यं इत्य
त अह॥ ततो भूय इव ते तमो य उ विद्यायां रताः। तत
स्तस्मादंधरूपतमसः भूय इव आधिकमिव ते तमः
प्रविशंति इत्यनुषंगः। ते के। ये कर्म हित्वा विद्यायाम

वरता केवलदेवताज्ञानं परा। मुच्येत एव ब्रह्मण्यादि
नो वा ब्रह्मसाक्षात्कारं विनेषकर्मसागिन इत्यर्थः।
ननु तर्हि कर्मविद्ययोर्निंदापामुच्चयमपि किं निः
११ फलमेवनेसाह। अन्यादेवाहुर्विद्यायाः अन्यदाहु
रविद्यायाः। इति शुश्रुम धीराणां ये नस्तद्विचाचचक्षि
रे।।१०। अन्यदेवापृथक्पृथगेवाहुर्वदंति। विद्या
यादेवताज्ञानेन ब्रह्मवादे विद्याया न लक्षणं वा आत्म
प्राप्तिलक्षणं वा फलं क्रियत इति। अन्यदाहुरविद्यया
कर्मणा पितृलोकं प्राप्तिलक्षणं फलं क्रियत इति।।
तथा च श्रुतिः। कर्मणा पितृलोको विद्यया देवलोक
इति। इति इत्थं शुश्रुम श्रुतवंतो वयं धीराणां पूर्वोक्त
तंत्रं न्यायकुशलानां धीमतां वराः ये देशिकाः नोस्म
भ्यं ज्ञानं कर्म च विचचक्षिरे व्याख्यातवंतः तेषा
पारंपर्यागतोऽयमागम इत्यर्थः। एवं विद्याविद्ययोः

82

पृथक् फलमुक्त्वेदानीं समुच्चयमाह ॥ विद्यां चाविद्यां च
यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्यया
ऽमृतमश्नुते ॥११॥ विद्यां च देवतपन । अविद्यां कर्म तदेतत् च
उभयं यो विद्वान् सहैकेन पुरुषेणानुष्ठेयं । वेद जानाति
एतज्ज्ञानवतस्तस्य फलमाह । अविद्या कर्म न ज्ञानेन मृ
त्युं स्वाभाविकं कर्मज्ञानं च दुःखबीजं तीर्त्वातिक्रम्य
विद्यया देवताज्ञानेन अमृतं देवेश्वरात्मभावमश्नु
ते । प्राप्नोति । देवो भूत्वा देवानप्येतीति श्रुतेः । अथवा अ
विद्यया ईश्वरार्पणं कर्मनिष्ठया मृत्युं विद्योत्पत्तिप्रति
बंधकर्मणा विद्यया वेदांतज्ञानेन अमृतं मोक्षम
श्नुते । प्राप्नोति । ऋषयः । पक्तिः कर्माणि ज्ञानं पर
मिका गतिरिति श्रुतेः । अथवा अविद्यया गुरूपास
नया मृत्युं कामजं अज्ञानं तीर्त्वा अतिक्रम्य विना

23

त्रोऽसर्थः। विद्यया चित्तप्रसादेनामृतमव्ययं सुखमाप्नो
१२ ति। अमृतस्यैवैतमो ज्योतिरमृतमिति श्रुतेः। चित्तस्य प्रसा+
+देनामृतमव्ययं सुखमाप्नोति+ हन्ति कर्मशुभाशुभं
प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नुत इति। तथा
रामं प्रति वसिष्ठः। विचारोपगमोपेतं चित्तमाराधया
त्मनः। तस्मिन् सिद्धे भवान् सिद्धो नोचेत्संवनगडन्न
इति। इदानीमव्यक्ताव्याकृतयोरुपासनस्य प्रत्येकं
निंदामाह॥ अंधंतमः प्रविशंति ये संभूतिमुपासते
ततो भूय इव ते तमो य उ संभूत्यां रताः॥१२॥ संभ
वनि संभूतिः सा नास्ति यस्याः सा असंभूतिः। प्रकृतिका
रणमव्ययं प्रधानं ब्रह्माक्षरं तमः प्रसूतमव्याकृता
ख्यं तां असंभूतिं उपासते। शेषं स्पष्टं। ये च संभूत्या
कार्यब्रह्मणि रूपमष्टि प्राणहिरण्यगर्भाख्ये रताः ते

ततः॥ भूय इव तमः प्रविशंति। अन्यादेवाहुः॥ अन्यादेवा
हुर्विद्याया अन्यदाहुरविद्यायाः। इति शुश्रुम धीराणां ये
नस्तद्विचचक्षिरे॥१३॥ संभवान् हिरण्यगर्भोपा
सनात्। शब्दतौलपइति। शेषं स्पष्टं॥ संभूतिं च वि
नाशं च यस्तद्वेदोभयं सह। विनाशेन मृत्युं तीर्त्वा सं
भूत्यामृतमश्नुते॥ यः कार्यकारणात्मकमेतदुभ
यं सह वेद जानाति स विनाशेन हिरण्यगर्भोपा
सनेन अणिमाद्यैश्वर्यादिकं मृत्युमतिक्रम्य कार
णोपासनेन अमृतं मोक्षलक्षणफलमश्नुते। तस्मि
न्लयं प्राप्नोति। अंधं तमः प्रविशंतीत्यादिभिः
मादिरेतेसुक्तं भवति। समस्तकेवलं धर्मधूममार्गेण चंद्र
लोकप्राप्तीकारणं। एवं मानुषदेवित्तोध्यं शास्त्रोक्त
प्र फलं श्रुतिलक्षणं तमेव। एतावत्संसारगतिरित्यर्थः
अतः सर्वैषणात्यागेन आनंदात्मैकरसं भवन्

मेव परमपुरुषार्थो नान्यत् इति । नेचुः । एवं प्रवृत्तिनिवृ
त्तिलक्षणौ वेदार्थौ प्रकाशयति । इदानीं कार्यकरणा
त्मा आदित्यमंडलस्थः पुरुषस्तत्प्राप्त्यै आदित्यप्रणामपू
१३ मंत्रानाह ॥ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । हिरण्मय प्रचुर
मिव हिरण्मय प्रकाशबहुलं तेन पिधानभूतेन आ
दित्यमंडलेन सत्यस्य । आदित्यमंडलस्थस्य ब्रह्मणः बा
धरहितस्य पुरुषस्य मुखद्वारं अपिहितं आच्छादितं
तद्धिरण्मयपात्रं । हे पूषन् पुष्टिकारिन् त्वं अपवृणु
अपसारय । किमर्थं तदाह । सत्यस्य तवोपासनाद
हमस्मि अपि सत्यधर्मा तस्मै मह्यं दृष्टये उपलब्धये तत्
व सत्यात्मनो दर्शनार्थमित्यर्थः । पूषन्नेकर्षे य
म सूर्य प्राजापत्य व्यूह रश्मीन् । समूह तेजो यत्ते रूपं
कल्याणतमं तत्ते पश्यामि ॥ योसावादित्ये पुरुषः सो

(28)

सावहं ॥ पूषन् जगतः पूषणात्पूषा तस्संबोधनं हे पूषन् ॥
एकर्षे एक एव ऋषति गच्छति से के पित तस्संबुद्धि रेकर्षे
एकचारिन् एव पुरुषती गच्छति सेकर्षि त्तस्संबुद्धिः ए
कर्षे एकचारिन् । समयम यतीति यमः । हे यम सर्वे नियं
तां सूर्यः । हे सुष्ठुगमन । प्राजापत्य । प्राजापतेरयं प्रा
जापत्यः । तत्संबोधनं हे प्राजापत्यं पेवं स्वं रश्मीन् ।
स्वानुरूपान् किरणान् पुसंहर । ततः समूह एकीकुरु
सम्प्यवस्थात्मा मा बंकू विसर्थः । किमर्थं तेजस्तापकं
ज्योतिस्वरूपकं । कल्याणतमं शोभनतमं अत्यंतानं
दात्मस्वरूपं ये ते रूपं तद्यथा पश्यामि । यो सावादित्यमं
डलस्थ परोक्षि प्रत्यक्षो सो व्याहृत्य प्रत्यक्षः पुरुष
पुरुषाकारत्वात् । प्राणरूपेण सर्वरूपाद्यपुरीषयन्ना
द्वा । एवमुक्तलक्षणः पुरुषः । सोहं अस्मस्प्रत्ययाव

लंबनो नयाम्हि। एतेमंत्राः। समुच्चयेनानुष्ठानानि सं
सच्चस्पष्टनीयाः। अंतकालेपि आत्मस्वरूपमात्मानं ध्या
त्यापष्टनीयाः। एवमुपासकस्य शरीरपातोत्तरं यद्भवति
तदाह॥ वायुरानिलममृतमथेदं भस्मांतं॥ शरीरं
ॐ क्रतो स्मर। क्लिबे स्मर। कृतं॥ स्मर॥ वायुः प्रा
१४ णः अनिलसमष्टिप्राणं अमृतं हिरण्यगर्भो त्वं
प्रतिपद्यते इति॥ वाक्यविशेषः। आथानंतरं इदं स्थू
लं पार्थिवशरीरं मग्नोहुतं। भस्मांतं भवति। पृ[illegible]
थ्वीप्राप्तिस्यर्थः। अथोपास्य। देवप्रार्थनामाह। ॐ
मिति सत्यात्मकं ब्रह्मेति वाच्यते।। क्रतो यज्ञपुरुषः। य
ज्ञो वै विष्णुरिति श्रुतेः। हे विष्णो व्यापक स्मर त्वदु
पासकं मां स्मर। तथा कृतं॥ स्मर। भो भगवन्नत्व
या का[illegible]रितमया बाल्यारभ्य तिकृतमनुष्ठितं कर्म

तश्च स्मरं । स्मृतं च स्मरेति पुनर्वचनमादरार्थं ॥ अथ ज्ञा
नमार्गवाचनमंत्रमाह ॥ अग्ने नय सुपथा राये अ
स्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहु
राणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१८॥ हे अग्ने
अस्मान् समुच्चयानुष्ठातॄन् सुपथा ज्ञानमार्गेणो
त्तरमार्गेण राये न यज्ञकर्मज्ञानफलभोगार्थं नय । नय
प्रापणे । प्रापयेत्यर्थः । तथा हे देव द्योतनात्मक विश्वानि
सर्वाणि वयुनानि कर्माणि ज्ञानानि च विद्वान् ज्ञातव
सं अत्र आस्माकं उपासकानां जुहुराणं हृच्छा कौटिल्य
इति धातोः । कुटिलं अनिलसितं प्रति बंधकमेनः युयो
धि पृथक्करणे पृथक्कुरु विनाशयेत्यर्थः । ततो वयं विशु
द्धाः संतो निलसितं प्राप्स्यामेति भावः । अस्मिन्नर्थे तु
भ्यं भूयिष्ठामतिशयेन भूयसीं नम उक्तिं नमस्कारव
चनं विधेमकरवाम । अस्मिन्काले अन्यां परिचर्यां क

तं मन्त्रा कावयं केवलनमस्कारवचनेन परिचर्यां एवेती तात्प
र्यार्थः। अथवाजसनेयशाखायां खंब्रह्मेति मंत्रोस्ति तस्य
यंव्याख्याविज्ञानानंदात्माः कंब्रह्म॥ ॐकारालंबनत्वेन
ध्यानमुच्यते। ॐ खंब्रह्मेति। ॐकारं खंब्रह्मेति ध्येयः।
टी अत्र ब्रह्म विशेष्यं। खं विशेषणं। नीलोत्पलवत्। खंब्रह्मे
ति विशेष्यंविशेषणयोश्च समानाधिकरणेन निर्देशः।
१५ ब्रंह्मेति ब्रंह्महत्। यस्क मात्रउच्यते। तत्खंब्रंह्मेति विशि
ष्यते। यत्खंपूर्णं तदोंकारवाच्यं। तथाचोक्तं। प्रणवे वाचक
स्यास्य सिवस्य परमात्मनः। शिवरुद्रादिशब्दानां प्रणवो
हि परं स्मृतमिति॥ तथा। वाचके प्रणवे ज्ञाते वाच्यं ब्रंह्म
प्रसीदति इति वाजनेसंहितायां॥ नहिनादात्परो मंत्रो
न देवः स्वात्मनः परः नमानस्यापरा पूजा नहि तृप्तेः
परं फलमिति॥ इति ईशावास्यभाष्यसमाप्तं॥ शांतप
श्रिमवराड बुर्जन ग्राममध्ये रामचंद्रासज अस्मा

30

रामचन्द्र जोशि उपनामकेन लिखितं ॥ शाके १७८१
सिद्धार्थिनाम संवत्सरे कार्त्तिक शुक्ल सप्तम्यां सौ
मवासरे तद्दिने इदं पुस्तकं समाप्तं ॥ लेखकपाठ
कयोः शुभं भवतु ॥ श्रीरस्तु ॥ जलात् रक्षेत्
तैलाद्रक्षेत् रक्षेत् शिथिलबंधनात् मुर्खहस्ते न दा
तव्यं येवं वदति पुस्तकं ॥ छ ॥ ॥ छ ॥ ॥

१६ ५.५८

॥इतिभाष्यंसमाप्तं॥

KKSU LIBRARY
RAMTEK
441 106
M1082
Dist. Nagpur

B2

```
[OrderDescription]
,CREATED=23.09.20 16:02
,TRANSFERRED=2020/09/23 at 16:10:15
,PAGES=32
,TYPE=STD
,NAME=S0003690
,Book Name=M-1082-ESHAVASYA BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,
```